श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकादशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकादशं दशकम् ॥

## सनकादीनां वैकुण्ठप्रवेशवर्णनं, जयविजयशापवर्णनं, हिरण्यकशिपुहिरण्याक्षोत्पत्तिवर्णनं च

क्रमेण सर्गे परिवर्धमाने
    कदापि दिव्यास्सनकादयस्ते।
भवद्विलोकाय विकुण्ठलोकं
    प्रपेदिरे मारुतमन्दिरेश ॥ **11.1** ॥

मनोज्ञनैश्रेयसकाननाद्यै -
    रनेकवापीमणिमन्दिरैश्च।
अनोपमं तं भवतो निकेतं
    मुनीश्वराः प्रापुरतीतकक्ष्याः ॥ **11.2** ॥

भवद्दिदृक्षून्भवनं विविक्षून्
    द्वाःस्थौ जयस्तान् विजयोऽप्यरुन्धाम्।
तेषां च चित्ते पदमाप कोपः
    सर्वं भवत्प्रेरणयैव भूमन् ॥ **11.3** ॥

वैकुण्ठलोकानुचितप्रचेष्टौ
    कष्टौ युवां दैत्यगतिं भजेतम्।
इति प्रशप्तौ भवदाश्रयौ तौ
    हरिस्मृतिर्नोऽस्त्विति नेमतुस्तान् ॥ **11.4** ॥

तदेतदाज्ञाय भवानवाप्तः
    सहैव लक्ष्म्या बहिरम्बुजाक्ष।

खगेश्वरांसार्पितचारुबाहु -
रानन्दयंस्तानभिराममूर्त्या ॥ **11.5** ॥

प्रसाद्य गीर्भिः स्तुवतो मुनीन्द्रा -
ननन्यनाथावथ पार्षदौ तौ।
संरम्भयोगेन भवैस्त्रिभिर्मा -
मुपेतमित्यात्तकृपं न्यगादीः ॥ **11.6** ॥

त्वदीयभृत्यावथ काश्यपात्तौ
सुरारिवीरावुदितौ दितौ द्वौ।
सन्ध्यासमुत्पादनकष्टचेष्टौ
यमौ च लोकस्य यमाविवान्यौ ॥ **11.7** ॥

हिरण्यपूर्वः कशिपुः किलैकः
परो हिरण्याक्ष इति प्रतीतः।
उभौ भवन्नाथमशेषलोकं
रुषा न्यरुन्धां निजवासनान्धौ ॥ **11.8** ॥

तयोर्हिरण्याक्षमहासुरेन्द्रो
रणाय धावन्ननवाप्तवैरी।
भवत्प्रियां क्ष्मां सलिले निमज्य
चचार गर्वाद्विनदन् गदावान् ॥ **11.9** ॥

ततो जलेशात् सदृशं भवन्तं
निशम्य बभ्राम गवेषयंस्त्वाम्।
भक्तैकदृश्यः स कृपानिधे त्वं
निरुन्धि रोगान् मरुदालयेश ॥ **11.10** ॥

॥ इति श्रीमन्नारायणीये एकादशं दशकं समाप्तम् ॥